# Ganesha Stutigitam

# ગણેશસ્તુતિગીતમ્

## Document Information

Text title : Ganesha Stuti Gitam

File name : gaNeshastutigItam.itx

Category : ganesha, stotra, sanskritgeet

Location : doc_ganesha

Transliterated by : Pranav and Vrushali Tendulkar pranav.tendulkar at gmail.com

Proofread by : Pranav and Vrushali Tendulkar pranav.tendulkar at gmail.com

Latest update : May 24, 2020

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 31, 2020

*sanskritdocuments.org*

# ગણેશસ્તુતિગીતમ્

હેમજાસુતં ભજે ગણેશમીશનન્દનં
    એકદન્ત વક્રતુણ્ડ નાગયજ્ઞસૂત્રકમ્ ।
રક્તગાત્ર ધૂમ્રનેત્ર શુક્લવસ્ત્રમણ્ડિતં
    કલ્પવૃક્ષ ભક્ત રક્ષ નમોઽસ્તુતે ગજાનનમ્ ॥ ૧॥

પાશપાણિ ચક્રપાણિ મૂષકાદિરોહિણં
    અગ્નિકોટિ સૂર્યજ્યોતિ વજ્રકોટિ નિર્મલમ્ ।
ચિત્રભાલ ભક્તિજાલ ભાલચન્દ્રશોભિતં
    કલ્પવૃક્ષ ભક્ત રક્ષ નમોઽસ્તુતે ગજાનનમ્ ॥ ૨॥

ભૂતભવ્ય હવ્યકવ્ય ભૃગુભાર્ગવાર્ચિતં
    દિવ્યવહ્નિ કાલજાલ લોકપાલવન્દિતમ્ ।
પૂર્ણબ્રહ્મ સૂર્યવર્ણ પૂરુષં પુરાન્તકં
    કલ્પવૃક્ષ ભક્ત રક્ષ નમોઽસ્તુતે ગજાનનમ્ ॥ ૩॥

વિશ્વવીર્ય વિશ્વસૂર્ય વિશ્વકર્મનિર્મલં
    વિશ્વહર્તા વિશ્વકર્તા યત્ર તત્ર પૂજિતમ્ ।
ચતુર્મુખં ચતુર્ભુજં સેવિતં ચતુર્યગં
    કલ્પવૃક્ષ ભક્ત રક્ષ નમોઽસ્તુતે ગજાનનમ્ ॥ ૪॥

ઋદ્ધિ બુદ્ધિ અષ્ટસિદ્ધિ નવનિધાનદાયકં
    યજ્ઞકર્મ સર્વધર્મ સર્વવર્ણાર્ચિતમ ।
પૂત ધૂમ્ર દુષ્ટ મુષ્ટ દાયકં વિનાયકં
    કલ્પવૃક્ષ ભક્ત રક્ષ નમોઽસ્તુતે ગજાનનમ્ ॥ ૫॥

હર્ષરૂપ વર્ષરૂપ પુરુષરૂપવન્દિતં
    શૂર્પકર્ણ રક્તવર્ણ રક્તચન્દનલેપિતમ્ ।
યોગ ઇષ્ટ યોગ સૃષ્ટ યોગ દૃષ્ટિદાયકં
    કલ્પવૃક્ષ ભક્ત રક્ષ નમોઽસ્તુતે ગજાનનમ્ ॥ ૬॥

ઇતિ ગણેશસ્તુતિગીતં સમાપ્તમ્ ।

*Ganesha Stutigitam*

pdf was typeset on May 31, 2020

Please send corrections to *sanskrit@cheerful.com*